12

1075CH12

# अशुद्धिसंशोधनम्

अध्यापक: — 'तुम सब पुस्तक पढ़ो' – अस्य वाक्यस्य संस्कृतभाषायाम् अनुवादं कुरुत।

(छात्रा: विचिन्तयन्ति)

अध्यापक: — कृतम् किम्?

(छात्रा: विचारमग्ना:)

अध्यापक: — उमेश! भवान् वदतु।

उमेश: — यूयं पुस्तकं पठन्तु।

अध्यापक: — 'यूयं पुस्तकं पठन्तु' इति अशुद्धं वाक्यम्। अमित! उत्तिष्ठ। शुद्धं करोतु।

अमित: — यूयं पुस्तकं पठत।

अध्यापक: — अतिसुन्दरम्। एतद् एव शुद्धं वाक्यम्।

छात्रा: — आम्।

अध्यापक: — संस्कृते बहूनि कारणानि भवन्ति यै: वाक्यानि अशुद्धानि भवन्ति।

(किञ्चित् विरम्य)

अध्यापक: — किं भवन्त: जानन्ति अशुद्धय: कियत्य: भवन्ति। पश्यन्तु

(अध्यापक: श्यामपट्टे लिखति।)

**1. कर्तृक्रिययो: अशुद्धय:—**

| **अशुद्धम् वाक्यम्** | | **शुद्धम् वाक्यम्** |
|---|---|---|
| (i) त्वं पाठं पठति। | — | त्वं पाठं पठसि। |
| (ii) ते लेखं लिखति। | — | ते लेखं लिखन्ति। (पुल्लिङ्गे) |
| | | ते लेखं लिखत:। (स्त्रीलिङ्गे) |
| (iii) वयं भोजनं खादामि। | — | वयं भोजनं खादाम:। |

© NCERT not to be republished

(iv) यूयं बहि: गच्छ। — यूयं बहि: गच्छत।

(v) त्वं लेखं लिखतु। — त्वं लेखं लिख।

(vi) युवां भोजनं खादताम्। — युवां भोजनं खादतम्।

(vii) आवां खेलनाय गच्छाम:। — आवां खेलनाय गच्छाव:।

(viii) अहं तत्र गमिष्याम:। — अहं तत्र गमिष्यामि।

(ix) स: एव बुद्धिमान् सन्ति। — स: एव बुद्धिमान् अस्ति।

(x) तौ उपवने क्रीडाव:। — तौ उपवने क्रीडत:।

(xi) ता: भोजनं पचति। — ता: भोजनं पचन्ति।

**2. विशेषणविशेष्ययो: अशुद्धय:—**

(i) चतुर: बाला: वदन्ति। — चतुरा: बाला: वदन्ति।

(ii) एक: कन्या एव एवं वदति। — एका कन्या एव एवं वदति।

(iii) नील: गगनं शोभते। — नीलं गगनं शोभते।

(iv) कुशला बाला: एव प्रश्नं पृच्छन्ति। — कुशला: बाला: एव प्रश्नं पृच्छन्ति।

(v) मधुरं फलानि खाद। — मधुरं फलं खाद।

(vi) कुशल: बाला एव स:। — कुशल: बाल: एव स:।

(vii) सुन्दराणि चित्रं स: रचयति। — सुन्दराणि चित्राणि स: रचयति।

(viii) तत् फलानि मधुराणि सन्ति। — तानि फलानि मधुराणि सन्ति।

(ix) ते बालिका: बुद्धिमत्य: सन्ति। — ता: बालिका: बुद्धिमत्य: सन्ति।

**3. लिङ्गसम्बन्धि–अशुद्धय:—**

(i) ते मम मित्रा: सन्ति। — तानि मम मित्राणि सन्ति।

(ii) फला: करण्डके सन्ति। — फलानि करण्डके सन्ति।

(iii) वृक्षाणि हरिता: सन्ति। — वृक्षा: हरिता: सन्ति।

(iv) उपवने पुष्पा: सन्ति। — उपवने पुष्पाणि सन्ति।

(v) शाखेषु खगा: सन्ति। — शाखासु खगा: सन्ति।

(vi) देवालयासु देवा: वसन्ति। — देवालयेषु देवा: वसन्ति।



© NCERT not to be republished

(vii) उपवन: सुन्दरम् अस्ति। — उपवनं सुन्दरम् अस्ति।

(viii) वन: अतिविस्तृतम् अस्ति। — वनम् अतिविस्तृतम् अस्ति।

(ix) खगानि आकाशे उड्डयन्ते। — खगा: आकाशे उड्डयन्ते।

(x) राधाया: ग्रीवम् शोभना अस्ति। — राधाया: ग्रीवा शोभना अस्ति।

**4. वाच्यसम्बन्धि–अशुद्धय:—**

(i) स: पाठ: पठ्यते। — तेन पाठ: पठ्यते।

(ii) तेन फलानि खाद्यते। — तेन फलानि खाद्यन्ते।

(iii) त्वम् लेख: लिख्यते। — त्वया लेख: लिख्यते।

(iv) त्वया ग्रन्थान् पठ्यन्ते। — त्वया ग्रन्था: पठ्यन्ते।

(v) त्वया भोजनं करोषि। — त्वया भोजनं क्रियते।

(vi) मया पाठा: स्मरामि । — मया पाठा: स्मर्यन्ते ।

(vii) तया कार्यं क्रियन्ते । — तया कार्यं क्रियते ।

(viii) अहं नियमा: पाल्यन्ते। — मया नियमा: पाल्यन्ते।

(ix) राधया गीतं गायति। — राधा गीतं गायति।

(x) अमितेन प्रात: उत्तिष्ठति। — अमितेन प्रात: उत्थीयते।

**5. उपपदसम्बन्धि–अशुद्धय:—**

(i) सीता रामस्य सह वनम् अगच्छत। — सीता रामेण सह वनम् अगच्छत्।

(ii) स: ग्रामस्य प्रति गच्छति। — स: ग्रामं प्रति गच्छति।

(iii) राधा मात्रे सदृशी अस्ति। — राधा मात्रा सदृशी अस्ति।

(iv) पिता पुत्रे क्रुध्यति। — पिता पुत्राय क्रुध्यति।

(v) स: अश्वेन पतति। — स: अश्वात् पतति।

(vi) स: विद्यालयेन आगच्छति। — स: विद्यालयात् आगच्छति।

(vii) वयं ग्रामे गमिष्याम:। — वयं ग्रामं गमिष्याम:।

(viii) बालक: कुक्कुरेण बिभेति। — बालक: कुक्कुरात् बिभेति।

(ix) पिता पुत्राय विश्वसिति। — पिता पुत्रे विश्वसिति।

(x) माता पुत्रीं स्निह्यति। — माता पुत्र्यां स्निह्यति।



© NCERT not to be republished

Reprint 2025-26

**6. वचनसम्बन्धि-अशुद्धय:—**

(i) स: पाठं पठन्ति। — स: पाठं पठति।

(ii) वयं लेखं लिखामि। — वयं लेखं लिखाम:।

(iii) त्वं कुत्र गच्छथ। — त्वं कुत्र गच्छसि।

(iv) ते पाठं स्मरति। — ते पाठं स्मरन्ति।

(v) यूयं तत्र गच्छतम्। — यूयं तत्र गच्छत।

(vi) सर्वे शक्तिमन्त: अस्ति। — सर्वे शक्तिमन्त: सन्ति।

(vii) त्वया सर्वाणि कार्याणि करणीयम्। — त्वया सर्वाणि कार्याणि करणीयानि।

(viii) ता: कन्या: तत्र अस्ति। — ता: कन्या: तत्र सन्ति।

(ix) तौ बालकौ गच्छति। — तौ बालकौ गच्छत:।

(x) ते बालिके पठन्ति। — ते बालिके पठत:।

**7. संख्यासम्बन्धि-अशुद्धय:—**

(i) त्रय: बालिका: वार्तालापं कुर्वन्ति। — तिस्र: बालिका: वार्तालापं कुर्वन्ति।

(ii) चत्वार: बालिका: क्रीडन्ति। — चतस्र: बालिका: क्रीडन्ति।

(iii) एका पुरुष: कार्यं करोति। — एक: पुरुष: कार्यं करोति।

(iv) त्रीणि सैनिका: देशं रक्षन्ति। — त्रय: सैनिका: देशं रक्षन्ति।

(v) पञ्चा: बालका: पठन्ति। — पञ्च बालका: पठन्ति।

(vi) द्वे बालकौ खादत:। — द्वौ बालकौ खादत:।

(vii) त्रय: पुस्तकानि सन्ति। — त्रीणि पुस्तकानि सन्ति।

(viii) एक: पात्रं तत्र अस्ति। — एकं पात्रं तत्र अस्ति।

(ix) त्रीणि पुरुषा: एव कार्यं कुर्वन्ति। — त्रय: पुरुषा: एव कार्यं कुर्वन्ति।

(x) चत्वार: कन्या: प्रसीदन्ति। — चतस्र: कन्या: प्रसीदन्ति।

**8. अन्या: अशुद्धय:—**

(i) राधा श्व: गच्छति। — राधा श्व: गमिष्यति।

(ii) बालक: ह्य: गच्छति। — बालक: ह्य: अगच्छत्।

(iii) भवान् किं कथयसि। — भवान् किं कथयति।

© NCERT not to be republished



Reprint 2025-26

(iv) रमा श्वः करोति। — रमा श्वः करिष्यति।

(v) सः ह्यः न पठति। — सः ह्यः न अपठत्।

## अभ्यासः

**1. अधोलिखितानि वाक्यानि शुद्धानि कुरुत —**

(i) वयं चित्रं पश्यन्ति। ..........

(ii) भवान् भोजनं खाद। ..........

(iii) त्वं पाठं स्मरतु। ..........

(iv) सः पीतः वस्त्रं धारयति। ..........

(v) त्रीणि वृक्षाः तत्र शोभन्ते। ..........

(vi) ताः महिलाः न गमिष्यति। ..........

(vii) त्वम् किं क्रियते। ..........

(viii) पिता श्वः आगच्छति। ..........

(ix) युष्माभिः किं पठन्ति। ..........

(x) सः तत्र न सन्ति। ..........

(xi) अमितेन एतत् कार्यं करोति। ..........

(xii) यूयं तत्र न गन्तव्यम्। ..........

(xiii) मया एतानि फलानि खादितव्यम्। ..........

(xiv) कन्याः पाठं पठति। ..........

(xv) अम्बा भोजनं पचन्ति। ..........

(xvi) तेन भोजनं खादनीयानि। ..........

(xvii) अम्बा तत्र सन्ति। ..........

(xviii) त्वम् जलं पानीयम्। ..........

(xix) ते लेखान् लिखति। ..........

(xx) अस्माभिः फलानि खाद्यते। ..........

© NCERT not to be republished



Reprint 2025-26